श्रया मता" तत्र कोष्ठाश्रयां कामलामाह "कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला" अधिकं कामलाशब्दे १८६६पृ०उक्तम्। सुश्रुते तु कुम्भाह्वयमित्युक्तं यथा "सकामलापालकिपाण्डुरोगकुम्भाह्वयो लाघरकोऽलसाख्यः" इत्युपक्रम्य "वक्ष्यामि लिङ्गान्यथ कामलायाः" इत्युक्त्वा कामलालक्षणादिकमुक्त्वा च "भेदांस्तु तस्याः शृणु कुम्भसाह्वं शोको महांस्तत्र च पर्वभेदैः" तेन कुम्भइत्येव तस्या नामान्तरम् ।

**कुम्भकार** पुंस्त्री कुम्भं करोति कृ–अण् उप० स० । (कुमार) १जातिभेदे अमरः । सा च जातिः "वैश्यायां विप्रतश्चौरात् कुम्भकारः सउच्यते" उशनसोक्ता ब्रह्मवैवर्त्ते तु "मालाकारात् चर्म्मकार्य्यां कुम्भकारोव्यजायत" इति "पट्टिकाराच्च तैलिक्यां कुम्भकारो बभूव ह" इति पुराणान्तरं तेन उत्तमाधमवर्ण सङ्करत्वात् जाति भेदस्तु देशभेदेन व्यवस्थाप्यः । जातित्वात् स्त्रियां ङीष् । २कुम्भकारके त्रि० स्त्रियां टाप् सि० कौ० मुग्धबोधमते ततोऽपि ङीप् तन्मते षण्प्रत्ययविधानात् । "यत् कुम्भकारपयनोपरिपङ्कलेपस्तापाय केवलमहो न च तापशान्त्यै" उद्भटः ३कुक्कुभविहगे पुंस्त्री०हेम० स्त्रियां ङीष् ।

**कुम्भकारिका** स्त्री कुम्भस्येव कार आकारोयस्याः कप् अत इत्त्वम् । १कुलत्थायाम् (कुरथि कलाइ) राजनि० तस्यास्तदाकारत्वात् तथात्वम् । कुम्भं करोति कृ–ण्वुल् । कुम्भकारक कुम्भकर्त्तरि त्रि० स्त्रियां टाप् अतइत्त्वम् ।

**कुम्भकारी** स्त्री कुम्भस्येव कार आकारोऽस्याः गौरा० ङीष् । १कुलत्थायाम् राजनि० २मनःशिलायां जटाध० कुम्भकारस्य कुलालस्य पत्नी ङीष् ३कुलालभार्य्यायाञ्च ।

**कुम्भकेतु** पु० कुम्भः केतौ ध्वजे यस्य । शम्बरासुरसेनापतिभेदे "कुम्भकेतुः सुदंष्ट्रश्च केशिरित्येवमादयः" हरि० १६२अ०

**कुम्भचक्र** न० नर० ज० उक्ते चक्रभेदे । चक्रशब्दे विवृतिः ।

**कुम्भज** पु० कुम्भाज्जायते जन–ड ५त० । १अगस्त्ये मुनौ कुम्भयोनिशब्दे विवृतिः । २वशिष्ठे मुनौ ३द्रोणाचार्य्ये च ४घटजाते त्रि० कुम्भजन्मकुम्भजातादयोऽप्यत्र ।

**कुम्भतुम्बी** स्त्री कुम्भ इव तुम्बी । अलाबूभेदे राजनि० तद्गुणास्तत्रैवोक्तायथा "मधुरा कुम्भतुम्बी तु शीता पित्तहरा मता । रुच्या ज्वरापहा प्रोक्ता श्वासकासकफास्रनुत्"

**कुम्भदासी** स्त्री कुट्टिकायां (पाना) शब्दरत्ना०

**कुम्भनाभ** पु० कुम्भइव नाभिरस्य अच्समा० । बलिदैत्यपुत्रभेदे "बलेः पुत्रशतं त्वासीत् वाणज्येष्ठं नराधिप ! । धृतराष्ट्रश्च सूर्य्यश्च चन्द्रमाश्चेन्द्रतापनः । कुम्भनाभो गर्द्दभाक्षः कुक्षिरित्येवमादयः" हरिवं० २अ०

**कुम्भपद्यादि** बहुब्रीहौ पादशब्दान्त्यलोपङीष्निपातन निमित्ते शब्दगणभेदे स च गणः "कुम्भपदी एकपदी जलपदी शूलपदी मुनिपदी गुणपदी शतपदी सूत्रपदी गोधापदी कलशीपदी विपदी तृणपदी द्विपदी त्रिपदी षट्पदी दासीपदी शितपदी विष्णुपदी सुपदी निष्पदी आर्द्रपदी कुनिपदी कृष्णपदी शुचिपदी द्रुपदी सूकरपदी शकृत्पदी अष्टपदी स्थूणपदी अपदी सूचीपदी" ।

**कुम्भपाद** त्रि०कुम्भ इव स्फीतः पादोऽस्य कुम्भपद्या० स्त्रीत्वेन विशेषोक्तेर्नान्त्यलोपः । वटतुल्यपादयुक्ते श्लीपदरोगयुते स्त्रियां कुम्भपद्या० अन्त्यलोपः ङीष् च । कुम्भपदी इतिभेदः ।

**कुम्भमण्डूक** पु० कुम्भे मण्डूक इव । कुम्भमात्रगम्यदेशतया निन्द्ये । पात्रेसमितादित्वात् क्षेपेऽस्य समासः तेन नास्य समासान्तरघटकता । युक्तारोह्यादित्वात् आद्युदात्तोऽयम्

**कुम्भमुद्रा** स्त्री "दत्त्वाङ्गुष्ठं पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु । सावकाशामेकमुष्टिं कुर्य्यात्" कुम्भमुद्रिका सा तन्त्र सारोक्ते मुद्राभेदे कलसमुद्रादयोऽप्यत्र स्त्री

**कुम्भयोनि** पु० कुम्भः योनिरुत्पत्तिस्थानमस्य । १अगस्त्ये मुनौ "प्रससादोदयादम्भः कुम्भयोनेर्महौजसः" रघुः । २वशिष्ठे मुनौ । तयोः यथा च तत्रउत्पत्तिस्तथाह रामा०उ०का० ६२अ० "अशरीरः शरीरस्य कृते न्यस्य महामुनिः । वसिष्ठस्तु महातेजा जगाम पितुरन्तिकम् । सोऽभिवाद्य ततः पादौ देवदेवस्य धर्म्मवित् । पितामहमथोवाच वायुभूतइदं वचः । भगवन्निमिशापेन विदेहत्वमुपागमम् । देवदेव ! महादेव ! वायुभूतोऽहमण्डज ! । सर्वेषां देहहीनानां महद्दुःखं भविष्यति । लुप्यन्ते सर्वकार्य्याणि हीनदेहस्य वै प्रभो ! । देहस्यान्यस्य सद्भावे प्रसादं कर्त्तुमर्हसि । तमुवाच ततोब्रह्मा स्वयंभूरमितप्रभः । मित्रावरुणजन्तेज आविश त्वं महायशः ! । अयोनिजस्त्वं भवितातत्रापि द्विजसत्तम ! । धर्म्मेण महता युक्तः पुनरेष्यसि मे वशम् । एवमुक्तस्तु देवेन अभिवाद्य प्रदक्षिणम् । कृत्वा पितामहं तूर्णं प्रययौ वरुणालयम् । तमेव कालं मित्रोऽपि वरुणत्वमकारयत् । क्षीरोदेन सहोपेतः पूज्यमानः सुरेश्वरैः । एतस्मिन्नेव काले तु उर्वशी परमाप्सराः । यह-